P.V.G.'s

Muktangan English School & Jr. College,

44, Vidyanagari, Parvati, Pune - 411009.

Ternimal Examination (2025-26)

Standard - IX

Subject : Sanskrit (Entire) Marks : 80

Date : 14-10-2025 Time : 8.00 to 11.00 am

प्रथम: विभाग: – सुगमसंस्कृतम् (५)

प्र.१ अ) चित्राणां नामानि लिखत । (केवलं ४) **(२)**

१)

२) 

३)

४)

५)

प्र.१ आ) सङ्ख्या अक्षरैः अङ्कैः वा लिखत । (३ तः२) **(१)**

१) ९७ – २) एकोनषष्टिः ३) ७० –

प्र.१ इ) अक्षरैः समयलेखनं कुरुत । (५ तः ४) (In Sanskrit) **(२)**

१) ८.४० – २) ९.५५ – ३) ४.३० –

४) ६.२० – ५) ११.१० –

द्वितीय: विभाग: – गद्यम् (२१)

प्र.२ अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।

कस्मिंश्चित् तपोवने वरतन्तुः नाम ऋषिः आसीत् । सः अध्यापने निपुणः प्रकृत्या दयालुः च आसीत् । सः अध्यापने निपुणः प्रकृत्या दयालुः च आसीत् । तस्य आश्रमे बहवः मेधाविनः बटवः आसन् । तेषु कश्चित् कौत्स्यः नाम बहुः आसीत् । विद्याधयनं समाप्य गुरुदक्षिणां दातुमुत्सुकः कौत्सः गुरुम्

उपागच्छत । सविनयं च स्वस्य इच्छां गुरवे अकथयत् । तस्य वच: श्रुत्वा गुरु: उक्तवान्, वत्स कौत्स, तव अध्ययनेन सेवयां च भृशं प्रीतोऽस्मि । अन्यां कामपि दक्षिणां नेच्छामि । गच्छ, स्वस्ति तुभ्यम् । गुरुणा वरतन्तुना निवारित: अपि कौत्स: वारंवारं दक्षिणां दातुम् ऐच्छत् । तदा तं परीक्षितुं वरतन्तु: अकथयत् – ''त्वया मम सकाशात् चतुर्दशविद्या: अधीता: । अत: चतुर्दशकटिसुवर्णमुद्रा: आनय ।''

क) एकवाक्येन उत्तरत । (३ त:२) **(२)**

१) वरतन्तु: ऋषि: कीदृश: आसीत्?

२) कौत्स: कति विद्या: अधीता:?

३) वरतन्तु ऋषि कुत्र आसीत्?

ख) वाक्यं पुनर्लिखित्वा क: कं वदति इति लिखत । **(१)**

''गच्छ, स्वस्ति तुभ्यम् ।''

ग) सन्धिविग्रहं कुरुत । **(१)**

प्रीतोऽस्मि – ________ + ________ ।

घ) सूचनानुसारं कृती: कुरुत । (४ त: ३) **(३)**

१) वर्णविग्रहं कुरुत । – वरतन्तु: –

२) लकारं लिखत । वारंवारं दक्षिणां दातुम् ऐच्छत् ।

३) गद्यांशात् आगता विशेषणानि चिनुत । (केनचित् व्दे)

४) गद्यांशात् समानार्थकशब्दं चिनुत । ज्ञानम् –

प्र.२ आ) गद्यांशं पठित्वा निर्दिष्टा: कृती: कुरुत ।

अनन्तरदिने प्रात: सा महता उत्साहेन रणरङ्गम् आगतवती । रणरङ्गे तां दृष्ट्वा एव शत्रुसैनिका: चकिता: भीता: च । तस्या: दर्शनमात्रेण एव तेषां धैर्यं नष्टं जातम् । सा यदा आयुधप्रहारम् आरब्धवती तदा ते सर्वथा हतोत्साहा: जाता: । विश्पला शत्रून् कदलीवृक्षान् इव लीलया कर्तितवती । सहस्राधिका: सैनिका: तया संहृता: । एवं विश्पलाया: शौर्यस्य कारणत: तस्मिन् युद्धे खेलराजस्य एव जय: अभवत् । वीरवनिता विश्पला भर्त्रा सह रणरङ्गं प्रविश्य शौर्येण युद्धं कृतवती। पादकर्तनानन्तरमपि अश्विनीकुमारयो: अनुग्रहेण पादं पुन: प्राप्तवती शत्रून् संहृतवती च। एतेन साहसेन सा वेदवाङ्मये बहुधा प्रशंसिता। विश्पलाया: शौर्यं तथा च अश्विनीकुमारयो: शल्यक्रियाकौशलं स्मरन्तु इति अस्मान् उपदिशति इतिहास:।

क) एकवाक्येन उत्तरत । (३ त: २) **(२)**

१) कस्या: दर्शनमात्रेण सैनिकानां धैर्यं नष्टं जातम्?

२) यदा विश्पला आयुधप्रहारम् आरब्धवती तदा किम् अभवत्?

३) इतिहास: अस्मान् किम् उपदिशति?

ख) सत्यं असत्यं वा इति वाक्यं पुनर्लिखित्वा लिखत । **(१)**

१) विश्पला शत्रून् नारिकेलवृक्षान् इव लीलया कर्तितवती ।

ग) सूचनानुसारं कृती: कुरुत । (४ त: ३) **(३)**

१) गद्यांशात् क्तवतु प्रत्ययान्त लिखत। (केनचित् व्दे)

२) प्रश्ननिर्माणं कुरुत । सहस्त्राधिका: सैनिका: तथा संह्यता: ।

३) गद्यांशात् तृतीया विमक्त्यान्त शब्दं लिखत । (केनचित् व्दे)

४) गद्यांशात् विरुद्धार्थक शब्दं चित्वा लिखत । मित्रम् × ———— ?

घ) सन्धिविग्रहं कुरुत ।) **(१)**

पादकर्तनानन्तरमपि – ———— + ———— ।

प्र. २ इ) गद्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत । **(५)**

१) स: कोलकतानगरे डाकतारविभागस्य निर्देशकरुपेण कार्यरत आसीत् । तस्य कार्यकाले एकस्मिन् दिने कोऽपि दु:खित: केरल प्रदेशीय: सैनिक: महोदयं मेलितुम् आगत: । स तस्य पित्रो: स्वास्थ्य विषये किञ्चिदपि ज्ञातुम् असमर्थ: । यत तदा पत्रस्यं प्रवासकाल: केरलत: अरुणाचल प्रदेशपर्यन्तं कश्चित् मासाधिकोऽपि आसीत् ।

प्र. २ ई) माध्यमभाषया उत्तरं लिखत । (प्रस्तावना अपेक्षिता) (२ त: १) **(२)**

१) विश्पलाया: शौर्यस्य वर्णनं कुरुत ।

२) माता तनयाया: विचारपरिवर्तनं कथं करोति?

तृतीय: विभाग: – पद्यम् (१६)

प्र. ३ अ) पद्यांशौ पठित्वा निर्दिष्टा: कृती: कुरुत ।

१) यस्य षष्ठी चतुर्थी च विहस्य च विहाय च ।
अहं कथं व्दितीया स्यात्, व्दितीया स्यामहं कथम् ।।

२) धनमलब्धं काङेत लब्धं रक्षेत् प्रयत्नत: ।
रक्षितं वर्धयेत् सम्यक्, वृद्धं तीर्थेषु निक्षिपेत् ।।

३) दु:खे दु:स्वाधिकान् पश्येत् सुखे पश्येत् सुखाधिकान् ।
आत्मानं शोकहर्षाभ्यां शत्रुभ्यामिव नार्पयेत् ।।

क) एकवाक्येन उत्तरत । (३ त: २) **(२)**

१) मनुज: कीदृशं धनं काङ्ेत?

२) सुखाधिकान् कदा पश्येत्?

३) वृद्धं धनं कुत्र निक्षिपेत्?

ख) सूचनानुसारं कृतीः कुरुत । (३ तः २) **(२)**

१) प्रथमश्लोकतः लयबन्त अन्ययानि चिनुत ।

२) तृतीयश्लोकतः विधिलिङ्क्रियापदानि चिनुत ।

३) सन्धिविग्रहं कुरुत । शत्रुभ्यामिव -

प्र. ३ आ) जालरेखाचित्रं पूरयत । **(२)**



प्र. ३ इ) पद्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत । (२ तः १) **(२)**

१) अकृत्वा परसन्तापम् अगत्वा खलमन्दिरम् ।
अनुत्सृज्य सतां वर्त्म यत्स्वल्पमपि तद् बहु ।।

२) दैवमेवेति सञ्चिन्त्य न स्वोद्योगं नरस्त्यजेत् ।
अनुद्यमेन कस्तैलं तिलेभ्यः प्राप्तुमर्हति ।।

प्र. ३ ई) रिक्तस्थानानि पूरयित्वा अन्वयं पुनर्लिखत । **(२)**

अक्रोधेन__________जयेत् । __________ असाधुं जयेत् ।
____________कदर्यं जयेत् । सत्येन च अनृतं ________ ।।

प्र. ३ उ) श्लोकौ पूर्णौ शुद्धौ च लिखत । (३ तः २) **(४)**

१) सुखार्थी चेत् --------- ।।

२) दृष्टिपतं न्यसेत् ---------।।

३) भुक्त्वा तृणानि ---------।।

प्र. ३ ऊ) माध्यमभाषया उत्तरं लिखत । (प्रस्तावना अपेक्षिता) (केवलं १) **(२)**

१) योगासनैः के लाभाः भवन्ति?

२) शवासनं कथं हितकरं भवति?

चतुर्थः विभागः – लेखन कौशलम् (१६)

प्र. ४ अ) निबन्धं पूरयत । **(५)**

भाद्रपदमासस्य चतुर्थे ---- गणेशोत्सवः ---- । तदा नैकेषु गृहेषु ---- स्थापना भवति । एषः उत्सवः कुत्रचित् सार्धकदिनात्मकः, कुत्रचित् पञ्च वा सप्त वा दशदिनात्मकः । अनन्तरं मूर्तेः विसर्जनं ---- क्रियते । लोकमान्य तिलक महोदयेन सार्वजनिक गणेशोत्सवः आरब्धः । भक्ताः दुर्वाङ्कुरैः पुष्पैः, मिष्टैः ---- च गणेशं ---- ।

(मञ्जुषा - जलाशये, दिने, मोदकैः, आरभते, गणेशमूर्तेः, पूजयन्ति)

प्र.४ आ) अव्ययानां । धातूनाम् उपयोगं कृत्वा वाक्यानि लिखत । (५ तः ३) **(३)**

१) १) समीपे - २) सह - ३) नमः - ४) गम् - ५) रुच् -

प्र.४ इ) योग्यं सङ्ख्याविशेषणानि चित्वा वाक्यानि पूरयत । (३ तः २) **(२)**

१) सः ____________ (४) वेदान् अधीतवान् ।

२) ____________(३) भुवनानां समूहः नामात्रिभुवनम् ।

३) ____________ (१) दासी सन्देशं कथितवती ।

प्र.४ ई) माध्यमभाषातः संस्कृतभाषया अनुवादं कुरुत । (६ तः ४) **(४)**

1) India is my Country.

2) Monkey lives on the tree.

3) There was a poet named Kalidas.

4) Children play in water.

5) Grandfather reads newspaper at 8'0 clock in the morning.

6) A Postman distributes letters.

अथवा

प्र.४ ई) मञ्जूषातः शब्दान् प्रयुज्य चित्रवर्णनं कुरुत । (४ वाक्यानि)



(मञ्जुषा - भ्राता, भगिनी, रक्षासूत्रं, दीपस्थालिका, माता, भित्तिकाचित्रं)

प्र.४ उ) अमरकोषात् समानार्थकशब्दं योजयित्वा वाक्यं पुनर्लिखत । (४ तः २) **(२)**

१) महिला आपणे गच्छति ।

२) अद्य विरामदिनः अस्ति ।

३) शुभम् भूयात् ।

४) चन्द्रसेनः नाम्ना राजा आसीत् ।

पञ्चम: विभाग: – व्याकरणम् (१४)

प्र. ५ अ) तालिकां पूरयत ।

क) नाम तालिकां पूरयत । (३ त: २) (२)

एकवचनम्	द्विवचनम्	बहुवचनम्	विभक्ती
–	भानुभ्याम्	भानुभि:	तृतीया
मधु	–	मधुनि	द्वितीया
मातरि	–	मातृषु	सप्तमी

ख) सर्वनाम – तालिकां पूरयत । (३ त: २) (२)

एकवचनम्	द्विवचनम्	बहुवचनम्	विभक्ती
भवत:	भवद्भ्याम्	–	पञ्चमी
–	एने	एनानि	द्वितीया
अस्या:	–	आसाम्	षष्ठी

ग) धात् – तालिकां पूरयत । (३ त: २) (२)

एकवचनम्	द्विवचनम्	बहुवचनम्	पुरुष:
–	रमावहै	रमामहै	उत्तम पुरुष:
–	पूजयतम्	पूजयत	मध्यम पुरुष:
नृत्येत्	–	नृत्येयु:	प्रथम पुरुष:

प्र. ५ आ) सूचनानुसार कृती: कुरुत । (५ त: ३) **(३)**

१) आरोग्यं भास्करात् इच्छेत् । (लकारपरिचयं कुरुत ।)

२) स्यूतात् वस्त्रं पतति । (बहुवचने परिवर्तयत ।)

३) काक: जलं (पा–पिब्) घटे उपविशति । (हेत्वर्थक अव्ययं प्रयुज्य वाक्यं पुनर्लिखत ।)

४) भवान् अत्र उपविशतु । (भवान् स्थाने त्वं उपयोजत ।)

५) हे ______ ; रक्ष माम् (प्रभु शब्दस्य योग्यं रुपं योजयत ।)

प्र.५ इ) पृथक्कुरुत । (८ त: ६) **(३)**

इतरेतर व्दव्द	समाहार व्दव्द

(स्कंदगणेशौ, मूषकमार्जारम्, पत्रपुष्पंफलम्, रामसीते, चन्द्रसूर्यो, वृक्षलता:)

प्र. ५ ई) वाक्यं शुद्धं कुरुत । (३ त: २) **(२)**

१) अहं ग्रन्थं पठाम: ।

२) आपणिक: देवं नतवती ।

३) शङ्कर: गणेशस्य पितरि ।

षष्ठ: विभाग: – अपठितम् (८)

प्र. ६ अ) गद्यांशं पठित्वा कृती: कुरुत । **(४)**

प्रभाते सूर्योदय: भवति । सूर्योदयात् प्राक् अरुणोदय: भवति । विहगा: मधुरेण कूजनेन रवे: स्वागतं कुर्वन्ति । भानो: सुवर्णमया: किरणा: भूमौ सर्वत्र प्रसरन्ति । एष: प्रात:काल: रम्य: । स मानवानाम्, विहगानाम्, पशूनाम अपि उत्साहवर्धक: आनन्दायक: च ।

१) पूर्णवाक्येन उत्तरत ।
अरुणोदय: कदा भवति?

२) वाक्यं पुनर्लिखित्वा सत्यम् / असत्यम् इति लिखत ।
विहगा: रवे: स्वागतं कुर्वन्ति ।

३) षष्ठी विभक्त्यन्तं २ पदं लिखत ।

४) लट्लकारस्य २ क्रियापदं चिनुत लिखत च ।

प्र. ६ आ) गद्यांश पठित्वां कृती: कुरुत ।

नमामि शारदां देवीं विद्‌यारम्भे सुमङ्गलम् ।
नर: तस्या: प्रसादेन पाण्डित्यं लभते सदा ।।

१) पूर्णवाक्येन उत्तरत । **(१)**

कवि: कां नमति?

२) समानार्थकशब्दं लिखत । **(१)**

१) शारदा – २) नर: –

प्र. ६ इ) पद्‌यांशं पठित्वां जालरेखाचित्रं पूरयत । **(२)**

उद्‌यम: साहसं धैर्य बुद्धि: शक्ति: पराक्रम: ।
षडेते यत्र वर्तन्ते तत्र देव: साहाय्यकृत् ।।



❖❖❖